# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – २०२१

| | | |
|---|---|---|
| कक्षा – आचार्यः | प्रश्नपत्रम् – ४ | गुणाः – ५० |
| विषयः – नव्यन्यायः | सत्रम् – २ | समयः – २:०० तः ४:०० |
| दिनाङ्कः – १६/०७/२०२१ | सन्दर्भग्रन्थः – न्यायभाष्यम् (द्वि.अ. अवयवनिरसनादारभ्य द्वितीयाह्निकपर्यन्तम्) | |

सूचना - निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।
प्रत्येकं प्रश्नस्य समानगुणाः। (१०)

**प्रश्नः १ अधोलिखितेषु द्वयोः व्याख्यां यथाभाष्यं लिखत।**

१ सर्वाग्रहणमवयव्यसिद्धेः।

२ वर्तमानाभावः पतितपतितव्यकालोपपत्तेः।

३ नाऽतीतानागतयोरितरेतरापेक्षा सिद्धिः।

४ वर्तमानाभावे सर्वाग्रहणं प्रत्यक्षानुपपत्तेः।

**प्रश्नः २ अनेकेष्ववयवेषु एकत्वमुपपाद्य परिहरत।**

**प्रश्नः ३ अनुमानपरीक्षां यथाभाष्यं लिखत।**

**प्रश्नः ४ शब्दप्रमाणपरीक्षां भाष्यानुसारं निरूपयत।**

**प्रश्नः ५ विध्यर्थवादानुवादवचनानि यथाभाष्यं व्याख्यात।**

**प्रश्नः ६ अधोलिखितेषु द्वयोः व्याख्यां यथाभाष्यं लिखत।**

१ अर्थापत्तिप्रमाणम् अनैकान्तिकत्वात्।

२ तत्त्वभाक्तयोर्नानात्वविभागादव्यभिचारः।

३ विभक्त्यन्तरोपपत्तेश्च समासे।

४ जात्याकृतिव्यक्तयः पदार्थः।

**प्रश्नः ७ शब्दस्यानित्यत्वं यथाभाष्यं विशदीकुरुत।**

**प्रश्नः ८ वर्णानित्यत्वप्रतिपादनं यथाभाष्यं कुरुत।**

**प्रश्नः ९ शब्दार्थयोः स्वरूपं यथाग्रन्थं प्रतिपादयत।**

**प्रश्नः१० द्वितीयाध्यायस्य द्वितीयाह्निकस्य सारं लिखत।**

**प्रश्नः११ अधोनिर्दिष्टेषु दशप्रश्नानां लघूत्तराणि लिखत।**

१ जातिः पदार्थो न वा?

२ अनुमानं कति कालेषु भवति?

३ कृतताकर्तव्यता कति कालेषु गृह्यते?

४ उपमानं कथं सिद्ध्यति?

५ ब्राह्मणवाक्यभेदाः के?

६ विधिविहितस्यानुवचनं किम्?

७ न्यायदर्शने प्रमाणानि कति?

८ परमाणुसमवस्थानं दर्शनयोग्यो भवति न वा? कुतः?

९ पुनरुक्तं साध्वसाधुर्वा?

१० कः विधिः?

११ अर्थापत्तिः प्रमाणान्तरं न वा?

१२ नैयायिकानां मते शब्दः नित्यो अनित्यो वा?

१३ का नाम मूर्तिः?

१४ का नाम जातिः?

१५ न्यायभाष्ये कति अध्यायाः सन्ति?

***